ढौकितव्यम्, ढौकयितव्यम्, डुढौकिषितव्यम्, डोढौकितव्यम्;
ढौकनीयम्, ढौकनीयम्, डुढौकिषणीयम्, डोढौकनीयम्;
ढौक्यम्, ढौक्यम्, डुढौकिष्यम्, डोढौक्यम्;
ईषड्ढौकः-दुर्ढौकः-सुढौकः; — —
ढौक्यमानः, ढौक्यमानः, डुढौकिष्यमाणः, डोढौक्यमानः;
ढौकः, ढौकः, डुढौकिषः, डोढौकः;
ढौकितुम्, ढौकयितुम्, डुढौकिषितुम्, डोढौकितुम्;
ढौका, ढौकना, डुढौकिषा, डोढौका;
ढौकनम्, ढौकनम्, डुढौकिषणम्, डोढौकनम्,
ढौकित्वा, ढौकयित्वा, डुढौकिषित्वा, डोढौकित्वा;
प्रढौक्य, प्रढौक्य, प्रडुढौकिष्य, प्रडोढौक्य;
ढौकम् २, ढौकित्वा २, } ढौकम् २, ढौकयित्वा २, } डुढौकिषम् २, डुढौकिषित्वा २, } डोढौकम् २; डोढौकित्वा २. }

## (654) "णक्ष गतौ" (I-भ्वादिः-662. सक. सेट्. पर.)

[1]नक्षकः-क्षिका, नक्षकः-क्षिका, निनक्षिषकः-षिका, नानक्षकः-क्षिका;
नक्षिता-त्री, नक्षयिता-त्री, निनक्षिषिता-त्री, नानक्षिता-त्री;
इत्यादीनि सर्वाण्यपि रूपाणि जक्षतिवत् (578) ज्ञेयानि। शत्रन्ते—नक्षन्, [2]प्रणक्षन्, स्त्रियां-नक्षन्ती; इति रूपोऽस्य धातोर्भवति।

## (655) "णख गत्यर्थः" (I-भ्वादिः-134. सक. सेट्. पर.)

नाखकः-खिका, नाखकः-खिका, निनखिषकः-षिका, नानखकः-खिका;
नखिता-त्री, नाखयिता-त्री, निनखिषिता-त्री, नानखिता-त्री;
[A]नखन्-न्ती, इत्यादीनि सर्वाणि रूपाणि कख (141) धातुवद् बोध्यानि।

## (656) "णखि गत्यर्थः" (I-भ्वादिः-135. सक. सेट्. पर.)

नङ्खकः-ङ्खिका, नङ्खकः-ङ्खिका, निनङ्खिषकः-षिका, नानङ्खकः-ङ्खिका;

---

1. 'णो नः' (6-1-65) इति धात्वादेर्णकारस्य नकारः। एवं णोपदेशधातुषु सर्वत्र ज्ञेयम्।
2. 'उपसर्गादसमासेऽपि णोपदेशस्य' (8-4-14) इति णत्वं भवति।
A. 'मखत्कपोतं मदमङ्खिबर्हिणं नखत्पिकं नङ्खितखञ्जनोत्करम्।' धा. का. 1.19.